# Rogahara Shri Guruvatapuradhipa Ashtakam

# रोगहरश्रीगुरुवातपुराधिपाष्टकम्

## Document Information

Text title : Guruvatapuradhipa Ashtakam

File name : guruvAtapurAdhipAShTakam.itx

Category : vishhnu, krishna, aShTaka

Location : doc_vishhnu

Transliterated by : P. R. Ramamurthy

Proofread by : P. R. Ramamurthy

Latest update : September 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2022

*sanskritdocuments.org*

# रोगहरश्रीगुरुवातपुराधिपाष्टकम्

गुरुपुरमन्दिर गोकुलसुन्दर गोपपुरन्दर गोपतनो
    गुणगणसागर भक्तशिवङ्कर कौस्तुभकन्धर केलितनो ।
गणपतिहोमजधूमसुवासितगव्यपयोर्पणतुष्टमते
    जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ १॥

मुरहर माधव मङ्गलसम्भव मान्यसुवैभव रम्यतनो
    मधुरिपुसूदन मातृसुपूजन मङ्गलवादन मोदमते ।
मधुमयभाषण चोद्धववन्दन तातसुपूजन तृप्तमते
    जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ २॥

प्रतिदिनमादरपूर्वदिनार्चितमाल्यविसर्जनदत्ततनो
    प्रतिदिनमर्पिततैलसुषेवणनाशितदुस्सहरोगरिपो ।
प्रतिदिनमद्भुतचन्दनचर्चित चम्पककल्पितमाल्यतते
    जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ३॥

करिवरकल्पितकञ्जसुमोत्तम कम्रकराम्बुज लोकगुरो
    भयततिमोचक भाग्यविधायक पुण्यसुपूरक मुग्धतनो ।
शिवजलमज्जनदर्शनवन्दनकीर्तनसंस्तुतभक्ततते
    जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ४॥

करजितपङ्कज कोटिरविप्रभ  कोमलकल्पितवेष हरे
    रविशतसन्निभ रत्नविनिर्मितरम्यकिरीट मनोज्ञ हरे ।
मुनिवर मुद्गलवंशसुरक्षण दीक्षित रक्षितपार्थ हरे
    जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ५॥

भवभयनाशक भोगविवर्धक भक्तजनस्तुतिमग्नमते
    यदुकुलनन्दन मङ्गलकारण शत्रुनिवारणदीक्षमते ।
गजपतिसंश्रयवाद्यसुघोषण नामसुकीर्तन हृष्टमते
    जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ६॥

विधिहरनारदतुम्बुरुसद्गुरुवायुमुखामरपूज्य हरे
कलियुगसम्भव कल्मषनाशक काम्यफलप्रद मोक्षपते ।
कविवरभट्टतिरिस्तुतिकम्पित मस्तकदर्शित दिव्यतनो
जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ७॥

चरणयुगागतभक्तजनार्पितदेहतुलाभरतुष्टमते
तवचरणाम्बुज मानसपून्दन दर्शितदिव्यगृहाधिपते ।
विषभयरक्षितपाण्ड्यनरेश्वर कल्पितमन्दिर वैद्यपते
जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ८॥

शिवदमनन्तपदान्वितरामसुदीक्षित सत्कवि पद्यमिदं
गुरुपवनाधिपतुष्टिदमुत्तममिष्टसुसिद्धिदमार्तिहरम् ।
पठति शृणोति च भक्तियुतो यदि भाग्यसमृद्धिमथो लभते
जय जय हे गुरुवातपुराधिप रोगमशेषमपाकुरु मे ॥ ९॥

इति रोगहरश्रीगुरुवातपुराधिपाष्टकं सम्पूर्णम् ।

Encoded and proofread by P. R. Ramamurthy

---

*Rogahara Shri Guruvatapuradhipa Ashtakam*
pdf was typeset on September 18, 2022

Please send corrections to *sanskrit@cheerful.com*